Vol.-VI No.-3 & 4 ISSN - 2231 1483

# Wisdom Herald

An International Research Journal of SITBS

SOCIETY FOR INDO-TIBETAN BUDDHIST STUDIES
Laxminagar, New Delhi (INDIA)

Wisdom Herald 2015 - Vol.-VI, No.-3 & 4

Scanned with CamScanner

Reg. No. V-41950 ISSN 2231 1483

# *Wisdom Herald*

An International Research Journal of SITBS

Vol-VI No.-3&4 Jul-Dec, 2015

*Chief -Editor*
**Prof. Shyam Nath Mishra**

*Editor*
**Dr. Jyoti Dubey**

*Published by*
**Society for Indo-Tibetan Buddhist Studies**
Laxminagar, New Delhi (INDIA)

Scanned with CamScanner

# श्रीसुभाषचरितम् में छन्दो-योजना

प्रो. अर्चना दुबे*

छन्दो-योजना में त्रिगुणानन्द शुक्ल दक्ष हैं। कवि का प्रिय छन्द भुजङ्गप्रयातहै। भुजङ्ग-प्रयात छन्द में कवि की विशिष्ट आसक्ति दृष्टिगोचर है। अन्य छन्दों में भी इन्द्रवज्रा, उपेन्द्रवज्रा, उपजाति, वंशस्थ, शिखरिणी, मन्दाक्रान्ता, शार्दूलविक्रीडित आदि छन्दों में भी निपुण हैं।

नमस्कृत्य शम्भुं नमस्कृत्य चण्डीं नमस्कृत्य देवांस्तथा राष्ट्रभक्तान्।
प्रबोधाय देशस्य भक्तिप्रियाणां प्रकुर्वे ततः काव्यमेतत् सुभाषम्॥[1]

**लक्षण** - भुजङ्गप्रयातं भवेद्यैश्चतुर्भिः इत्थं स वस्तुसहितो गतवांस्तदानीं
यस्मिंस्थले विविधकष्टसहाजनास्ते। तेषां हि कष्टशमनाय चिकित्सकाना-
मादाय तत्र समुदायमुपासकानाम्॥[2]

अथ प्रकृष्टो जननायको हि सः युवा स्वदेशं परदेशिशासनात्।
विमुक्तिकामः प्रययौ स्वगेहतः सभास्थलं यत्र समागता जनाः॥[3]

सहजभावविरोधसमाकुलः स्वधिकरूपविपक्षसमर्थितः।
ब्रिटिशशासनयुक्तिमस्वीकृता-मतिगभीरधिया कृतवानसौ॥[4]

नेता सुभाषो जननायकोऽसौ कांग्रेसकार्ये रतनायकानाम्।
संघीयराज्यस्य हि शासनाय गतो विरुद्धो मतभेदरूपे॥[5]

महासभा सा त्रिपुरीतिपूर्या-मायोजिताभूद्विषमापदायाम्।
विरोध आसीच्च सदस्यमध्ये कार्यं तु जातं सकलं विवादे॥[6]

द्वितीयवारं स सदस्यवर्गे निर्वाचितोऽभूदत एव वृद्धाः।
क्षुब्धा हि भूत्वा सहयोगमस्मै प्रदातुमैच्छन्न विरोधरूपे॥[7]

महाज्वराक्रान्तसुभाषनेता गतो हि कांग्रेससभां विपन्नः।
इत्थं स देशस्य कृते सकष्टः ज्वरोऽपि वृद्धिंगत आबभूव॥[8]

स्वीयं विरोधं सकलैः सदस्यै-र्महात्मनः पक्षधरैः कुवाक्यैः।
समूहरूपे विहितं हि दृष्ट्वा विषादयुक्तः सहसा बभूव॥[9]

समादरं प्राप गतो हि यत्र सभासदस्याः मुमुदुःसुतुष्टा॥
समर्पितोऽसौ जननायकश्च तुष्टो नितान्तः स्वजनैः सुपूज्यः॥[10]

---

*प्रोफेसर साहित्य - संस्कृत श्री सोमनाथ संस्कृत विश्वविद्यालय वेवारल, जिलागीर, सोमनाथ, गुजरात
चलदूरवाणी

Scanned with CamScanner

आगामिनि तु महत्त्वरूपे जाता हि कांग्रेससभा प्रसिद्धा ।
प्रान्ते बिहारे सुविशालभूते वनादेशे सुनियोजिता सा ।।[11]
वैदेशिकैर्निर्मितमत्र सत्यं तेषां नमस्कारकरूपचिह्नम् ।
तत् कौतुकीलं तु विनष्टरूपे सत्याग्रहस्तेन कृतो हि द्रष्टुम् ।।[12]
कोलाहलस्तत्र समस्तबंगे जातस्तथा शासकवर्गमध्ये ।
अतः सुभाषः पुनरेव कारां संप्रेषितोऽभुद् ब्रिटिशेन वीरः ।।[13]
भृशं विचार्यापि न लब्धमार्गो निष्कर्षरूपेऽहमिदं ब्रवीमि ।
असङ्ख्यनानां मललाऽपि हत्वा वैदेशिकानां न सुखाय भूयात् ।।[14]
हत्वापि चास्माकमशेषरूपे वैदेशिकानां हृदये न तृप्तिम् ।
कदापि दास्यत्वातिपूर्णरूपे साम्राज्यभूतं न हि व्यक्तिकार्यम् ।।[15]
नेताऽपि तेषां वचनैः सुतुष्टः प्रभावितोऽभूत् समराय सज्जः ।
तथापि कार्यं सुगहद्गभीर-मतः शनैस्तेन कृतं हि सर्वम् ।।[16]
सम्बोध्य सर्वान् समुवाच नेता युद्धस्य वार्तामितिहासरूपे ।
महात्मना गांधिमहोदयेन सञ्चालितं युद्धमतिप्रकृष्टम् ।।[17]
उभौ हि तात्कालिकसम्प्रदायौ समागतौ किन्तु न कार्यसिद्धिः ।
दृष्टा स्वराज्ये सहकारिरूपे तथापि मार्गः सकलैर्गृहीतः ।।[18]
आन्दोलनेनैव न कार्यसिद्धि - स्तथाऽपि लाभस्तु बभूव कश्चित् ।
लोको हि सुप्तः पुनरेव सम्यक् प्रोत्थाय क्रान्तेः सरणिं जगाम ।।[19]
आदौ हि सर्वे जननायकस्य महात्मनोद्दिष्टपथं हि जग्मुः ।
हिंसाविरोधे कृतकार्यभूताः देशस्य सेवां महतीमकुर्वन् ।।[20]
हिंसाविरोधे बहवो हि लोका- स्तथाऽप्यनेकेऽतिसमर्थकाश्च ।
सुभाषनेताऽपि तथैव चासीत् समष्टिरूपे पथिको हि तेषाम् ।।[21]
इत्थं च तेन सुधिया सकलं हि कार्यं कृत्वा विदेशगमनाय कृतं प्रयाणम् ।
देशेऽपि तस्य पथिगामिजनास्तथैव स्वान्दोलनं प्रबलशक्तियुतं प्रचेलुः ।।[22]
त्रयस्त्रिंशद्वर्षे गतोऽसौ विदेशं स्वयं ज्ञातुमिच्छन् हि तत्रत्यवार्ताम् ।
तदानीन्तनं क्रान्तिरूपं विशिष्टं चतुस्त्रिंशवर्षे परावर्तितोऽभूत् ।।[23]
अथात्मनः कार्यमचिन्तयन् स्वयं स्वदेशकल्याणदिशि व्यवस्थितः ।
कथं स्वदेशे हि स्वकीयशासनं भवेत्समुत्पार्य विदेशिशासनम् ।।[24]
अथ गतः स वपुः सुनियन्त्रितः सततकार्यनियोगसुतत्परः ।
मनसि तस्य सदैव ह्युवास तु सकलदेशहिताय समर्पणम् ।।[25]

Scanned with CamScanner

पञ्चमदश सर्ग -1, 4, 6, 15 वे सर्ग में भुजंगप्रयात छन्द का प्रयोग हुआ है ।, सर्ग 3, 8, 9, 10, 11, 12, 13, 14 वे सर्ग में उपजाति, इन्द्रव्रजा, उपेन्द्रव्रजा छन्द का प्रयोग हुआ ।

सर्ग 2,5,7 वे सर्ग में वंशस्थ छन्द का प्रयोग हुआ है । अन्तिम पद्यों में छन्द परिवर्तन सर्ग 2,5,7,8,11,15 वे सर्ग में द्रुतविलम्बित छन्द का प्रयोग हुआ है ।

सर्ग 1, 6, 9, 10, 12, 13 वे सर्ग में वसन्ततिलका छन्द का प्रयोग हुआ है । सर्ग 14वें सर्ग में शिखरणी छन्द का प्रयोग हुआ है । सर्ग 15वें सर्ग में मन्दाक्रान्ता छन्द का प्रयोग हुआ है ।

**(Footnotes)**

1. श्रीसुभाषचरितम्, 1/1 भुजङ्गप्रयातछन्द, पृ. 1
2. श्रीसुभाषचरितम्, 1/46 ।। वसन्ततिलकाछन्द पृ. 12
3. श्रीसुभाषचरितम्, 2/1 ।। वंशस्थ पृ. 13
4. श्रीसुभाषचरितम्, 2/57 ।। पृ. 27
5. श्रीसुभाषचरितम्, 3/1 ।। इन्द्रवज्रा पृ. 28
6. श्रीसुभाषचरितम्, 3/6 ।। उपेन्द्रवज्रा । पृ. 29
7. श्रीसुभाषचरितम्, 3/7 ।। उपजातिछन्द पृ. 29
8. श्रीसुभाषचरितम्, 3/9 ।। उपेन्द्रवज्रा पृ. 30
9. श्रीसुभाषचरितम्, 3/10 ।। उपजातिछन्द पृ. 30
10. श्रीसुभाषचरितम्, 3/15 ।। उपेन्द्रवज्रा पृ. 31
11. श्रीसुभाषचरितम्, 3/16 उपजाति पृ. 32
12. श्रीसुभाषचरितम्, 3/21 इन्द्रवज्रा पृ. 33
13. श्रीसुभाषचरितम्, 3/22 उपजाति पृ. 33
14. श्रीसुभाषचरितम्, 3/26 इन्द्रवज्रा पृ. 34
15. श्रीसुभाषचरितम्, 3/27 उपजाति पृ. 34
16. श्रीसुभाषचरितम्, 3/37 उपेन्द्रवज्रा पृ. 37
17. श्रीसुभाषचरितम्, 3/38 उपजाति पृ. 37
18. श्रीसुभाषचरितम्, 3/41 उपेन्द्रवज्रा पृ. 38
19. श्रीसुभाषचरितम्, 3/42 उपजाति पृ. 38
20. श्रीसुभाषचरितम्, 3/43 उपेन्द्रवज्रा पृ. 38
21. श्रीसुभाषचरितम्, 3/44 उपजाति पृ. 39
22. श्रीसुभाषचरितम्, 3/45 इन्द्रवज्रा पृ. 39
23. श्रीसुभाषचरितम्, 4/1 ।। भुजङ्गप्रयात पृ. 40
24. श्रीसुभाषचरितम्, 5/1 ।। वंशस्थ पृ. 51
25. श्रीसुभाषचरितम्, 5/46 द्रुतविलम्बित पृ. 62

Scanned with CamScanner